APPENDIX - II

समराङ्गण सूत्रधारः (अध्याय 57)

1. तस्योपरि स्यात कलशो वर्तुलस्त्रिपदोच्छ्रितः ।
तोरणैर्मकरैः पत्रैः साग्रैश्च सव(म) रलकैः ॥46॥
हस्तिमुण्डैः समाकीर्णमध(प्स) रोगणभूषितम् ।
इदृशं श्रीधरं कुर्यात् सर्वालंकारभूषितम् ॥ 47॥

2. विचित्रभूमिके (सप्तदशभिल्लिख्यराक्षणप्यपि ?)।
स्तम्भैर्विविधविन्यासैर्बहुभङ्गविनिर्मितैः ॥
भूषितैः कर्मभिश्चित्रैः सर्वत्र शुभलक्षणैः ।
चन्द्रशालादिसंयुक्तैस्तोरणैश्चारुचामरैः ॥ (P. 404)

3. मदान्धिकुलाकीर्णगजवक्त्रविभूषितैः ।
विद्याधरवधूवृन्दैः क्रीडारम्भविभूषितैः ॥ (P. 404)

4. सुराणां सुन्दरीभिश्च वीणाहस्तैश्च किन्नरैः।
सिद्धगन्धर्वयक्षाणां वृन्दैश्च परितः स्थितैः ॥(P. 404)

5. अप्सरोभिश्च दिव्याभिर्विमानावलिभिस्तथा ।
चारुचामिकरान्दोलाक्रीडासक्तैश्च (निःसराम ?) ॥(P. 404)

6. नागकन्याकदम्बैश्च सर्वतः समलङ्कृतम् ।
एवंविताभिः सर्वत्र भूमिकाभिर्निरन्तरम् ॥ (P. 404)

अपराजितपृच्छा (अध्याय 190, वितानवर्णन)

7. अष्ट द्वादश द्विरष्ट चतुर्विंशतिर्द्वात्रिंशत् ।
चतुःषष्टिर्विद्याधरास्तदूर्ध्वे च वराङ्गनाः ॥14॥

8. ततानद्धनाद्यैश्च वादित्रैः सुखरैस्तथा ।
नाटकैर्नृत्यरङ्गद्यैर्गीतनादैरकथा ॥15॥

(गृहग्रामनगरशोभा 25-26)

9. घटीस्थानोत्तरे कार्या विचित्रा नृत्यशालिकाः।
वितानैः शालभञ्जीभिर्घण्टाद्याद्यैर्विभूषिता ॥ 26॥

(नागरप्रासादविभक्तिस्तरप्रमाण, अध्याय 127-21,24)

10. कार्या तदूर्ध्वे जङ्घा च पञ्चत्रिंशत्समुच्छ्रिता ।
क्रमनिर्माणतः स्तम्भैर्नासिकोपाङ्गफालना ॥ 21॥

11. मूलनासासु सर्वासु स्तम्भैः स्युश्चतुराश्रिकाः ।
गजश्च सिंहव्यालैश्च मकरैः समलङ्कृताः ॥ 22॥

12. कर्णेष्वष्टौ च दिक्पालाः प्राच्यादिषु प्रदक्षिणम् ।
नटेशः पश्चिमे भद्रे द्वान्धकैः सह दक्षिणे ॥23॥

13. चण्डस्य चोत्तरे देवी दंष्ट्राननसुशोभिताः ।
वीतरागे च शासनदेव्यश्चैव दिशाः प्रति ॥ 24॥

(भूधरादिब्रह्मनगरं, अध्याय 70, 21)

14. कर्णे कर्णे तु कर्त्तव्या वृत्ताद्यालकशोभना ।
(त्रि) सहस्रान्ते पुनः कुर्याद्योधविधरी तथा ॥21॥

(समाष्टकवेदीनिर्णयो, अध्याय 77-7)

15. निष्क्रान्ता च चतुर्भद्रैर्वेक्षी कार्या सुशोभना
भद्रे भद्रे द्विशालीनि सा मता रत्नसंभवा ॥ 7॥

16. तस्याश्च प्रत्येकशालं प्रतिभद्रविभूषितम् ।
उत्पला च समाख्याता महाराजेन्द्रवल्लभा ॥8॥

17. अम्बिन्याख्यावितानानि विचित्राणि च मध्यतः ।
अनेककाररूपाश्च राजक्रीडोचिताः स्थिताः ॥ 9॥

18. शालभञ्जिकादि प्रतिमा स्तम्भविमानसम्भवाः ।
मुक्तलूमच्छाद्योपरि घण्टाकूटैरलंकृताः ॥ 10॥

19. दिव्यसौवर्णकलशैर्मतवारणसम्युताः ।
सुरसद्मोपमाश्चैव नृपसदाग्रमण्डपाः ॥ 11 ॥

(लक्षणासमुच्चया, अध्याय - 26-9,11)

20. रविभाषा न कुड्यानि भ्रमणात् नखांशकैः ।
अष्टाविंशतिभिर्भित्तिः शायस्तम्भ कुमारिकैः ॥69॥
हृदासारेश्वतुर्दिषु मंडपस्त्रिंशदंशकैः ।
चतुस्तम्भाश्च तन्मध्ये द्वादशस्यकुमारिके ॥ 10 ॥
तिस्रस्तिस्रस्तु कोणेषु स्तम्भाग्रे कुमारिके ।
पार्श्वयोरग्रमो वापि कुमदिसार सयुते ॥ 11॥

(काश्यपशिल्पपटल, अध्याय 48-49,51)

21. अन्तिकान्तियुता रक्ताः कोशाग्रालकान्विताः।
नानाबन्धनसंयुक्ता नानापुष्पैरलंकृताः ॥49॥
दुकूलवसनाः सर्वाः पीनोन्नतघनास्तनाः।
मध्यसूक्ष्माश्च सौम्याश्च किंचित्प्रहसिताननाः ॥50॥
नानागन्धानुलिप्ताङ्गाः भद्रपीठोपरि स्थिताः।
समभङ्गयुताः सप्तसङ्ख्या अप्सरसागणाः ॥51॥